# Kalishatanamastotra from Brihannilatantra

# કાલીશતનામસ્તોત્રમ્ બૃહન્નીલતન્ત્રાર્ગતમ્

## Document Information

Text title : kAlIshatanAmastotram bRRihannIlatantrAntargatam

File name : kAlIshatanAmastotrambRRihannIla.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : muktabodha.org

Proofread by : DPD

Description-comments : Brihannilatantra

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : March 8, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# કાલીશતનામસ્તોત્રમ્ બૃહન્નીલતન્ત્રાર્ગતમ્

શ્રીદેવ્યુવાચ ।

પુરા પ્રતિશ્રુતં દેવ ક્રીડાસક્તો યદા ભવાન્ ।
નામ્નાં શતં મહાકાલ્યાઃ કથયસ્વ મયિ પ્રભો ॥ ૨૩-૧॥

શ્રીભૈરવ ઉવાચ ।

સાધુ પૃષ્ટં મહાદેવિ અકથ્યં કથયામિ તે ।
ન પ્રકાશ્યં વરારોહે સ્વયોનિરિવ સુન્દરિ ॥ ૨૩-૨॥

પ્રાણાધિકપ્રિયતરા ભવતી મમ મોહિની ।
ક્ષણમાત્રં ન જીવામિ ત્વાં બિના પરમેશ્વરિ ॥ ૨૩-૩॥

યથાદર્શેઽમલે બિમ્બં ઘૃતં દધ્યાદિસંયુતમ્ ।
તથાહં જગતામાદ્યે ત્વયિ સર્વત્ર ગોચરઃ ॥ ૨૩-૪॥

શ ૃણુ દેવિ પ્રવક્ષ્યામિ જપાત્ સાર્વજ્ઞદાયકમ્ ।
સદાશિવ ઋષિઃ પ્રોક્તોઽનુષ્ટુપ્ છન્દશ્ચ ઈરિતઃ ॥ ૨૩-૫॥

દેવતા ભૈરવો દેવિ પુરુષાર્થચતુષ્ટયે ।
વિનિયોગઃ પ્રયોક્તવ્યઃ સર્વકર્મફલપ્રદઃ ॥ ૨૩-૬॥

મહાકાલી જગદ્ધાત્રી જગન્માતા જગન્મયી ।
જગદમ્બા ગજત્સારા જગદાનન્દકારિણી ॥ ૨૩-૭॥

જગદ્વિધ્વંસિની ગૌરી દુઃખદારિદ્ર્યનાશિની ।
ભૈરવભાવિની ભાવાનન્તા સારસ્વતપ્રદા ॥ ૨૩-૮॥

ચતુર્વર્ગપ્રદા સાધ્વી સર્વમઙ્ગલમઙ્ગલા ।
ભદ્રકાલી વિશાલાક્ષી કામદાત્રી કલાત્મિકા ॥ ૨૩-૯॥

નીલવાણી મહાગૌરસર્વાઙ્ગા સુન્દરી પરા ।
સર્વસમ્પત્પ્રદા ભીમનાદિની વરવર્ણિની ॥ ૨૩-૧૦॥

વરારોહા શિવરુહા મહિષાસુરઘાતિની ।
શિવપૂજ્યા શિવપ્રીતા દાનવેન્દ્રપ્રપૂજિતા ॥ ૨૩-૧૧॥

સર્વવિદ્યામયી શર્વસર્વાભીષ્ટફલપ્રદા ।
કોમલાઙ્ગી વિધાત્રી ચ વિધાતૃવરદાયિની ॥ ૨૩-૧૨॥

પૂર્ણેન્દુવદના નીલમેઘવર્ણા કપાલિની ।
કુરુકુલ્લા વિપ્રચિત્તા કાન્તચિત્તા મદોન્મદા ॥ ૨૩-૧૩॥

મત્તાઙ્ગી મદનપ્રીતા મદાઘૂર્ણિતલોચના ।
મદોત્તીર્ણા ખર્પરાસિનરમુણ્ડવિલાસિની ॥ ૨૩-૧૪॥

નરમુણ્ડસ્રજા દેવી ખડ્ગહસ્તા ભયાનકા ।
અટ્ટહાસયુતા પદ્મા પદ્મરાગોપશોભિતા ॥ ૨૩-૧૫॥

વરાભયપ્રદા કાલી કાલરાત્રિસ્વરૂપિણી ।
સ્વધા સ્વાહા વષટ્કારા શરદિન્દુસમપ્રભા ॥ ૨૩-૧૬॥

શરત્જ્યોત્સ્ના ચ સંહ્લાદા વિપરીતરતાતુરા ।
મુક્તકેશી છિન્નજટા જટાજૂટવિલાસિની ॥ ૨૩-૧૭॥

સર્પરાજયુતાભીમા સર્પરાજોપરિ સ્થિતા ।
શ્મશાનસ્થા મહાનન્દિસ્તુતા સંદીપ્તલોચના ॥ ૨૩-૧૮॥

શવાસનરતા નન્દા સિદ્ધચારણસેવિતા ।
બલિદાનપ્રિયા ગર્ભા ભૂર્ભુવઃસ્વઃસ્વરૂપિણી ॥ ૨૩-૧૯॥

ગાયત્રી ચૈવ સાવિત્રી મહાનીલસરસ્વતી ।
લક્ષ્મીર્લક્ષણસંયુક્તા સર્વલક્ષણલક્ષિતા ॥ ૨૩-૨૦॥

વ્યાઘ્રચર્માવૃતા મેધ્યા ત્રિવલીવલયાઞ્ચિતા ।
ગન્ધર્વૈઃ સંસ્તુતા સા હિ તથા ચેન્દા મહાપરા ॥ ૨૩-૨૧॥

પવિત્રા પરમા માયા મહામાયા મહોદયા ।
ઇતિ તે કથિતં દિવ્યં શતં નામ્નાં મહેશ્વરિ ॥ ૨૩-૨૨॥

યઃ પઠેત્ પ્રાતરુત્થાય સ તુ વિદ્યાનિધિર્ભવેત્ ।
ઇહ લોકે સુખં ભુક્ત્વા દેવીસાયુજ્યમાપ્નુયાત્ ॥ ૨૩-૨૩॥

તસ્ય વશ્યા ભવન્ત્યેતે સિદ્ધૌઘાઃ સચરાચરાઃ ।

ખેચરા ભૂચરાશ્ચૈવ તથા સ્વર્ગચરાશ્ચ યે ॥ ૨૩-૨૪॥

તે સર્વે વશમાયાન્તિ સાધકસ્ય હિ નાન્યથા ।
નામ્નાં વરં મહેશાનિ પરિત્યજ્ય સહસ્રકમ્ ॥ ૨૩-૨૫॥

પઠિતવ્યં શતં દેવિ ચતુર્વર્ગફલપ્રદમ્ ।
અજ્ઞાત્વા પરમેશાનિ નામ્નાં શતં મહેશ્વરિ ॥ ૨૩-૨૬॥

ભજતે યો મહકાલીં સિદ્ધિર્નાસ્તિ કલૌ યુગે ।
પ્રપઠેત્ પ્રયતો ભક્ત્યા તસ્ય પુણ્યફલં શ‌ૃણુ ॥ ૨૩-૨૭॥

લક્ષવર્ષસહસ્રસ્ય કાલીપૂજાફલં ભવેત્ ।
બહુના કિમિહોક્તેન વાઞ્છિતાર્થી ભવિષ્યતિ ॥ ૨૩-૨૮॥

ઇતિ શ્રીબૃહન્નીલતન્ત્રે ભૈરવપાર્વતીસંવાદે કાલીશતનામનિરૂપણં
ત્રયોવિંશઃ પટલઃ ॥ ૨૩॥

Proofread byDPD

*Kalishatanamastotra from Brihannilatantra*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*